## दिक्सङ्ख्ये सञ्ज्ञायाम् । (५०/७२७)

समानाधिकरणेन इत्यापाद[1]समाप्तेरनुवर्तते । दिग्वाचिनः शब्दाः[2] [3]सङ्ख्या च समानाधिकरणेन [4]सुबन्तेन सह समस्यन्ते, तत्पुरुषश्च [5]समासो भवति सञ्ज्ञायां विषये । [6]पूर्वेषुकामशमी । अपरेषुकामशमी[7] । [8]पञ्चाम्राः । सप्तर्षयः । सञ्ज्ञायाम् इति किम्? उत्तरा वृक्षाः । पञ्च ब्राह्मणाः ॥

## तद्धितार्थोत्तरपदसमाहारे च । (५१/७२८)

दिक्सङ्ख्ये इत्यनुवर्तते । तद्धितार्थे [9]विषये उत्तरपदे च परतः समाहारे चाभिधेये दिक्सङ्ख्ये समानाधिकरणेन सुपा [10]सह समस्येते, तत्पुरुषश्च समासो भवति ।

[11]तद्धितार्थे तावत् – पूर्वस्यां शालायां भवः, 'दिक्पूर्वपदादसञ्ज्ञायां ञः' (४.२.१०७/१३२८), पौर्वशालः । [12]आपरशालः । उत्तरपदे – पूर्वशालाप्रियः । अपरशालाप्रियः । समाहारे दिक्शब्दो न सम्भवति । सङ्ख्या तद्धितार्थे[13] – पाञ्चनापितिः । पञ्चकपालः[14] । उत्तरपदे – पञ्चगवधनः । दशगवधनः । समाहारे – [15]पञ्चपूली । दशपूली । [16]पञ्चकुमारि । दशकुमारि (म.भा. १.३९५) । [17]'स नपुंसकम्' (२.४.१७/८२१) इति नपुंसकत्वम् । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७/३१८) इति ह्रस्वत्वम् ॥

## सङ्ख्यापूर्वो द्विगुः । (५२/७३०)

'तद्धितार्थोत्तरपदसमाहारे च' (२.१.५१/७२८) इत्यत्र [18]यः सङ्ख्यापूर्वः समासः [19]स द्विगुसञ्ज्ञो भवति । तद्धितार्थे तावत् – [20]पञ्चसु कपालेषु संस्कृतः[21] पञ्चकपालः । दशकपालः । 'संस्कृतं भक्षाः' (४.२.१६/१२१७) [22]इतीह अण्, तस्य 'द्विगोर्लुगनपत्ये' (४.१.८८/१०८०) इति लुक् । उत्तरपदे – पञ्चनावप्रियः । 'नावो द्विगोः' (५.४.९९/८०१) इति समासान्तो भवति । समाहारे – [23]पञ्चपूली । 'द्विगोः' (४.१.२१/४७९) इति ङीब् भवति । द्विगुप्रदेशाः – 'द्विगोः' (४.१.२१/४७९) इत्येवमादयः ॥

## कुत्सितानि कुत्सनैः । (५३/७३२)

[24]कुत्सितवाचीनि सुबन्तानि [25]कुत्सनवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । [26]शब्दप्रवृत्तिनिमित्तकुत्सायामयं समास इष्यते । 'विशेषणं विशेष्येण बहुलम्' (२.१.५७/७३६) इति परनिपाते प्राप्ते विशेष्यस्य पूर्व[27]निपातार्थ आरम्भः । [28]वैयाकरणखसूचिः (म.भा. १.३९७) । निष्प्रतिभः इत्यर्थः । याज्ञिककितवः । [29]अयाज्ययाजनतृष्णापरः । मीमांसकदुर्दुरूढः । नास्तिकः[30] । कुत्सितानि इति किम्? वैयाकरणश्चौरः । न ह्यत्र वैयाकरणत्वं कुत्स्यते । कुत्सनैः इति किम्? कुत्सितो ब्राह्मणः ॥

---

1. °परिसमाप्तेः इ.क.फ. 2. सुबन्ताः इत्यधिकम् क.ड. 3. संख्यावाचिनः क.ड.इ.ह.फ. 4. सुपा ह. 5. समासः स भवति फ. 6. पूर्वश्चासौ इषुकामशमी च इत्यधिकम् ड. 7. ग्रामसंज्ञा इत्यधिकम् क. 8. सप्ताम्राः इ, पञ्चाग्नी ब. 9. विषयभूते क.ड.इ.फ.ह. 10. उत्तरपदेन ह. 11. दिक् तावत् तद्धितार्थे क. ड.इ.ह, तावत् तद्धितार्थे फ. 12. औत्तरशालः ह, नास्ति इ. 13. तावत् इत्यधिकम् इ. 14. दशकपालः इत्यधिकम् क.ड.ग. 15. पंचफली अ.ड. 16. पंचकुमारी, दशकुमारी इ.ह. 17. स नपुंसकम् – ह्रस्वत्वम् नास्ति क.ड. 18. यः नास्ति फ. 19. स नास्ति फ. 20. पञ्चसु कपालेषु संस्कृतः नास्ति फ. 21. ओदनः इत्यधिकम् क.ड. 22. इत्यनेन आगतस्य अणः द्विगोर्लुक् इति इ, द्विगुत्वात् तद्धितस्य लुग् भवति क. 23. पंचफली ब, दशपूली इत्यधिकम् क. 24. कुत्सितवचनानि ह, कुत्सेन वाचीनि क. 25. कुत्सनवाचिभिः क. 26. शब्दप्रवृत्तिकुत्सायाम् फ. 27. °निपातार्थोऽयं क. 28. उदाहरणमिदं नास्ति ग. 29. अयाज्ययाजनात् क. इ. फ, अयाज्ययाजकः ड. 30. इत्यर्थः इत्यधिकम् इ.ग.